गौड़ीय-गौरव-ग्रन्थ-गुच्छः ।

श्रीश्रीकृष्णाभिषेकः

—: वा :—

श्रीश्रीकृष्णजन्मातिथिस्नानविधिः ।

श्रीपाद श्रीरूपगोस्वामि-विरचितः ।

श्रीहरिदास दासेन प्रकाशितः ।
[नवद्वीप-हरिबोलकुटीरतः]

४५७ श्रीचैतन्याब्दः



सर्वस्वत्वं सुरक्षितं]

[मूल्यं सप्रेमाचरणं

सूचना।

श्रीश्रीसनातन-गोस्वामि-पादानां विनिदेशतः श्रीश्रीरूपगोस्वामिभि र्विरचितोऽयं ग्रन्थः साम्प्रतं श्रीश्रीगुरुगौराङ्गकृपया मुद्रापितः। ऋग्-वेदस्य शुक्लयजुर्वेदस्य च मन्त्रैरेवास्य कलेवरं प्रायशः संभूषितमिति यथास्थानं व्यक्तीभावि। श्रीकृष्णजन्माष्टमी स्नानविधिरेवात्र विस्तरतो लिखितः। श्रीवृन्दावने श्रीश्रीराधारमणस्याभिषेकश्चानेनैव विधाने-नाद्यावधि प्रचलित आस्ते। यद्यपि श्रीग्रन्थोयं श्रीकृष्णाभिषेकविधा-वेव प्रयोक्तव्यस्तथापि स्थलविशेषे किञ्चित् परिवर्त्तनं संघटय्य देवता-न्तराणामपि अभिषेको ऽनेनैव विधानेन सुष्ठु सम्पत्स्येतेति निर्णेतव्यं सुधीभिः।

वैदिकमन्त्राणामधुना यथायथमुच्चारणाशक्त्वादुदात्तादिस्वर-चिह्नानि न प्रदर्शितानीति मन्तव्यं। श्रीश्रीराधारमणसेवाधिकारि-श्रील वनमालीलाल गोस्वामिनां पुस्तकद्वयं तथा केशिघट्टस्थश्रीराधिकानाथ-गोस्वामिनां ग्रन्थागारस्यैकं दृष्ट्वाऽस्य पाठोद्धारः कृतः। शोधनविषये प्रयत्नातिरेकेऽपि कुत्रचित् स्खलनं सञ्जातमिति वैदिकमन्त्राणां निर्दिष्ट-स्थलानि दृष्ट्वा शोधनीयं मर्षणीयञ्चेति सप्रश्रयं याचते मतिमन्दोऽयं दीन आश्रवः।

* श्रीश्रीगौराङ्गगदाधरौ विजयेताम् *

श्रीकृष्णाभिषेकः ।

मत्वा वृन्दाटवीनाथौ प्रभूणां विनिदेशतः ।
लिख्यते शास्त्रलोकाभ्यां कृष्णजन्मतिथे र्विधिः ॥ १ ॥
अथ पूर्वाह्णे सप्तम्यां स्नानवेदी-परिष्क्रियां ।
कुर्य्यान्मङ्गलवादित्रै र्गीतपूर्वकमङ्गने ॥ २ ॥
तत्पुरो दीर्घिकाकारं लघिष्टं खातमाचरेत् ।
रोपयेत् कदलीस्तम्भानस्याः कोण-चतुष्टये ॥ ३ ॥
रक्तै स्तान् सप्तधा सूत्रैः सर्वतः परिवेष्टयेत् ।
चन्द्रातपं तदुपरि विस्तार्य्यं नवचित्रितम् ॥ ४ ॥
पताकारोपणं सुष्ठु कुर्य्यात्तद्दिक्चतुष्टये ।
मङ्गलानि च वस्तूनि स्थापयेत्तत्र सर्वतः ॥ ५ ॥
अथ प्रातः सतां वृन्दैः कृष्णजन्माष्टमीदिने ।
नृत्य-कीर्त्तन-वादित्र-सङ्कुले कौतुकोत्तरे ॥ ६ ॥
दीप-मङ्गलकुम्भाद्यै र्वेद्यामुज्ज्वलिताकृतौ ।
शुद्धि-न्यासादि-पूर्वाङ्गकर्मनिर्वाह-पूर्वकम् ॥ ७ ॥
कृष्णस्य विजयं कुर्य्याच्छत्र-चामर-सेवितं ।
'पुनन्तु मे'त्यृचा कुर्य्यात्ततोऽत्र स्वस्तिवाचनं ॥ ८ ॥

पुनन्तु मां देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम् ॥ (ऋग्वेद ७-२-१८-२७)

तथाऽस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।
ॐ पुण्याहं । ॐ पुण्याहं । ॐ पुण्याहं ॥

उद्गातेव शकुने साम गायसि । ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमती रपीत्या सर्वतो नः । शकुने भद्रमावद ।
विश्वतो नः शकुने पुण्यमावद ॥ (ऋ २।८-१२-२)

अस्य कर्मणः स्वस्ति भवन्तो ब्रुवन्तु । आयुष्मते स्वस्ति ।

ॐ स्वस्ति । ॐ स्वस्ति । ॐ स्वस्ति ॥ स्वस्ति न इन्द्रो वृद्ध-
श्रवाः स्वस्ति नः पुषा विश्ववेदाः । स्वस्ति न स्तार्क्ष्यो अरिष्टनेमिः स्वस्ति
नो बृहस्पतिर्दधातु ॥ (ऋ १।६ १६।६)

अस्य कर्मणो ऋद्धिं भवन्तो ब्रुवन्तु ।
ॐ ऋध्यताम् ॐ ऋध्यताम् ॐ ऋध्यताम् ॥

ऋध्याम स्तोमं सनुयाम वाजमानो सन्त्रा सरथेहोष यातम् ।
यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः ॥
(ऋ ८।६।२।११)

कुर्य्यात् 'प्राच्यै दिश' इति दिग्बन्धं श्वेत-सर्षपैः ।

प्राच्यै दिशे स्वाहा । अर्वाच्यै दिशे स्वाहा । दक्षिणायै दिशे स्वाहा । अर्वाच्यै दिशे स्वाहा । प्रतीच्यै दिशे स्वाहा । अर्वाच्यै दिशे स्वाहा । उदीच्यै दिशे स्वाहा । अर्वाच्यै दिशे स्वाहा । ऊर्ध्वायै दिशे स्वाहा । अर्वाच्यै दिशे स्वाहा । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा । (शुक्ल यजुः २२।२४)

'अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्त्तार स्ते नश्यन्तु शिवाज्ञया ॥' इति भूतानपसारयेत् ।

घटस्य स्थापनं कुर्य्यात्तत्तन्मन्त्रै र्विधानतः ॥ ६ ॥
'भूरसीति' स्पृशेद् भूमिं.....

भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः ॥ (शुक्लयजुः १३।१८)

धान्यं 'धान्यमसीति' च ।

धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि। (शुक्लयजुः १।२०)

'आजिघ्रेति' घटं न्यस्य···

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयि (शुक्लयजुः ८।४२)

'वरुणस्येति' वै जलं ॥ १० ॥ दत्त्वा

वरुणस्योत्तम्भनमसि वरुणस्य स्कन्भसर्जनीस्थः। वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि। वरुणस्य ऋतसदनमासीद। (शुक्ल यजुः ४।३६)

तत्र न्यसेत् दृश्यमश्वत्थेवे'ति पञ्चपल्लवं।

अश्वत्थे वो निषदनं पर्णे वो वो वसतिःकृता गोभाज इत् किलासथ यत् सनवथ पूरुषं। (ऋ ८।५।८।५)

'याः फलिनी' रिति फलं···

याः फलिनी र्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पति प्रसूता स्ता नो मुञ्चत्वंहसः॥ (ऋ ८।५।१०।१५)

पुष्पं तु 'श्रीश्च ते' इति ॥ ११ ॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं। इष्णन्निषाणामुम्म इषाण सर्व्वलोकं म इषाण॥ (शुक्ल यजुः ३१।२२)

'गणानां त्वे'ति मन्त्रेण गणेशं तत्र पूजयेत् ॥ १२ ॥

गणानां त्वा गणपतिꣳ हवामहे। प्रियाणां त्वा प्रियपतिꣳ हवामहे। निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥ (शुक्ल यजुः २३।१९)

अथ संकल्पः—ॐ विष्णुः ॐ तत्सदद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यान्तिथौ अमुकगोत्रः अमुकदेवशर्मा श्रीकृष्णप्रीतिकामः श्रीकृष्णस्य जन्म-महोत्सवे महापूजा-पूर्वक-महाभिषेकमहं करिष्ये ।

"अवतार-सहस्राणि करोषि मधुसूदन !
न ते संख्यावतारणां कश्चिज्जानाति वै भुवि ॥
देवा ब्रह्मादयो वापि स्वरूपं न विदुस्तव ।
अत स्त्वां पूजयिष्यामि मातुरुत्सङ्ग-संस्थितं ॥
वाञ्छितं कुरु देवेश ! दुष्कृतं चैव नाशय ।
कुरुष्व मे दयां देव ! संसारार्त्तिभयापह ॥" इति प्रार्थयेत्

अथासनादिना कृष्णं पाद्यार्घ्याचमनैरपि ।
सेवेत मधुपर्केण पुनराचमनेन च ॥ १३ ॥

पाद्यादि दीपान्तं "ॐ यज्ञेश्वरायेति" प्रत्येकं पठेत् ।
ॐ यज्ञेश्वराय यज्ञसम्भवाय यज्ञपतये गोविन्दाय नमो नमः ॥ इति

(पाद्यं श्यामाक-दूर्वाब्ज-विष्णुक्रान्ताभि रिष्यते ।
तिल-सर्षप-पुष्पाणि गन्ध दूर्वाक्षता स्तथा ॥ १४ ॥
यवाः कुशाग्रमित्येतदर्घ्याष्टकमुदीरितम् ॥
जाती-लवङ्ग-कङ्कोलै र्मंतमाचमनीयकं ।
घृतं दधि तथा क्षौद्रं मधुपर्को विधीयते ॥ १५ ॥
आज्यमेकपलं ग्राह्यं दध्न श्चिपलमेव च ।
मधुनः पलमेकन्तु मधुपर्कः स उच्यते) ॥ १६ ॥
'हिरण्यगर्भ' इत्यादीनेव मन्त्रान् जपं स्ततः ।
कृष्णं निर्मञ्छयेत् पिष्टदीपावल्या सुदृश्यया ॥ १७ ॥

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ २

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपद श्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सदाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ४
येन द्यौ रुग्रा पृथिवी च दृह्ला येन स्व स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ५
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधिसूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥ ६
आपो ह यद् बृहती र्विश्वमायन् गर्भं दधाना जनयन्ती रग्निं ।
ततो देवानां समवर्त्तासुरेकः कस्मै देवाय हविषा विधेम ॥ ७
याश्चदापो महिना पर्य्यपश्यद्दक्षं दधाना जनयन्ती र्यज्ञं ।
या देवेष्वधिदेव एक आसीत् कस्मै देवाय हविषा विधेम ॥ ८
मा नो हिꣳसी र्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
य श्चापश्चन्द्रा बृहती र्जजान कस्मै देवाय हविषा विधेम ॥ ९
(ऋ ८।७३।१-९)

तत स्तिलै स्तमुद्वर्त्य मूर्द्धानं दिव' इत्यृचा ।

मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निं ।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥
(ऋ ४।५।९।१)

स्नापयेत्तं 'तिलोसीति' तिलपिष्टजलै स्ततः ॥ १८ ॥

तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः ।
प्रयत्नमद्भिः पृक्तः सुधया पुष्टजा पितॄन् लोकान् प्रीणाहि नः स्वाहा ॥

तद् वस्त्रं परिवर्त्याथ स्थिरं तत्र निवेशयेत् ।
तत स्तं स्नापयेच्छुद्धं 'वरुणस्येति' वारिभिः ॥ १९ ॥

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थः, वरुणस्य

ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद। (शुक्ल यजुः ४ ३६) तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः। अहेड़मानो बरुणेह बोध्युरुशꣳ स मा न आयुः प्रमोषीः। (शुक्ल यजुः १८।४९) वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। कुरुतां नः सुराधसः ॥ (शुक्ल यजु ३३ ४६)

स्नापयेत पञ्चगव्येन तत्तन्मन्त्रयुजा ततः ।
(गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं ।
अमीभि र्वस्तुभिः षड्भिः पञ्चगव्यमिति स्मृतम् ॥ २०)
गायत्र्यादाय गोमूत्रं (गायत्री तु प्रसिद्धा)
'गन्धद्वारेति' गोमयं ।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम् ॥

'आप्यायस्वेति' वै दुग्धं ।

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं ।
भवा वाजस्य संगथे ॥ (ऋ १।६ २२।१६)

'दधिक्राव्णेति' वै दधि ॥ २१ ॥

दधि क्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्रण आयूꣳषि तारिषत् ॥ (ऋ ३।७ १३ ६)

'तेजोऽसीति' घृतं तत्र

तेजोसि शुक्रमस्यमृतमसि । धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि । (शुक्ल यजुः १।३१।३-४)

'देवस्य त्वा' कुशोदकं ।

देवस्य त्वा सवितुः प्रसवेश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्यां। सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पते ष्ट्वा साम्राज्येनाभिषिञ्चामि आनये जुष्टं गृह्णामि अग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ (शुक्लयजुः ९।३०)

तत्तन्मन्त्रयुजा पञ्चामृतेन स्नपनं ततः ॥ २२
दुग्धं दधि घृतं क्षौद्रं सितेत्यमृतपञ्चकम् ॥ तत्परिमाणं लेख्यं

"पयः पृथिव्यां" पयसि

पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ (शुक्ल यजुः १८।३६)

दध्नि पूर्वोक्तमेव हि। घृतं घृतेति हविषि।

घृतं घृतपावानः पिवत वसां वसापावानः पिवताम्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा। (शुक्ल यजुः ६।१९)

'मधुवाता' मधुन्यपि।

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वी र्नः सन्त्वोषधीः मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः ॥ मधु द्यौ रस्तु नः पिता ॥ मधुमान्नो वनस्पति र्मधुमाँ अस्तु सूर्य्यः। माध्वी र्गावो भवन्तु नः ॥
(ऋ १।६।१७।६-८)

'अपां रसमुद्वयसं' सितायां मन्त्र ईरितः ॥ २३

अपां रसमुद्वयसꣳसूर्य्ये सन्तꣳ समाहितं। अपाꣳरसस्य यो रस स्तं वो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमं। (शुक्ल यजुः ६।३)

अभिषिच्योष्णतोयेन 'सप्तते ग्ने'ति माधवं।

सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयः सप्तधाम प्रियाणि। सप्त होत्राः, सप्तधा त्वा यजन्ति। सप्तयोनी रापृणस्व घृतेन स्वाहा ॥
(शुक्ल यजुः १७।७९)

'या ओषधी' रिति प्रोक्ष्य लिम्पेत सर्वौषधीद्रवैः ॥ २४
(मुरामांसीवचाकुष्ठं शैलेय रजनीद्वयं।
शटीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः ॥)

तत्र मन्त्रः — या ओषधीः पूर्वा जाता देवेभ्य स्त्रियुगं पुरा मनैनु बभ्रूणा महं शतं धामानि सप्त च । (ऋ ८।५।८।१)

'या ओषधी'रिति ततो महौषधियुताम्भसा ।
(सहदेवी वचा व्याघ्री वल्गा चातिबला तथा ।
शङ्खपुष्पी तथा सिंही सूर्य्यावर्त्ता तथाष्टमी ॥
महौषध्यष्टकं ह्येतन्महास्नानेषु योजयेत् ॥) २५

तत्र मन्त्रः—या ओषधीः सोमराज्ञी र्बह्वीः शतविचक्षणाः ।
'ता मह्यमस्मिन्नासनेऽछिद्राः शर्म यच्छतेति' * ॥

'सुमङ्गलीति' मन्त्रेण मङ्गलद्रव्यैः पूजयेत् । २६

(मङ्गलद्रव्याणि यथा —पद्मकं रोचना दूर्वा दर्भं पिञ्जूलमेव च ।
जातिपुष्पं कुन्दपुष्पं मङ्गलानि निवेशयेत् ॥)

तत्र मन्त्रः—ॐ सुमङ्गलीरियं वधू रिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन ॥ (ऋ ८।३।२६)

'आब्रह्मन्निति' मन्त्रेण ततो बीजाष्टकेन च ।
(यव-गोधूम-नीवार-तिल-श्यामाक-शालयः ॥
प्रियङ्गवो व्रीहयश्च बीजाष्टकमिदं स्मृतं ॥ २७)

मन्त्रः—आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्यो तिव्याधी महारथो जायतां दोग्ध्री धेनु र्वोढानड्वानाशुः सप्तिः । पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् । (शुक्ल यजुः २२।२२)

हिरण्यावो'ति मन्त्रेण पावमानीभिरेव वा ।
स्नापयेद्बल-तोयेन रत्नं मुक्तादिकं भवेत् ॥ २८

हिरण्यात्तः सविता देव आगाद्यत्रद्रप्तानि दाशुषे वीर्य्याणि ।

* तासां त्वमस्युत्तमारं कामाय शं हृदे ॥ (ऋ ८,५।११।१६)

पावमानीः स्वस्त्ययनी सुदुघाहि घृतश्चुतः। ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितं। पावमानी र्दिशन्तु न इमं लोकमथो अमुं। कामान् समर्द्धयन्तु नो देवै र्देवीः समाहिताः। येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पावमान्यः पुनन्तु मां। प्राजापत्यं पवित्रं शतो द्यामं हिरण्मयं तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे। इन्द्रः सुनीति सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या यमो राजा प्रमृणाभिः पुनातु मां जातवेदा मूर्जयन्त्या पुनातु।

'सरस्वत्यै' इति ततः सिञ्चेत् पुष्पोदकेन च।

सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्या याभिषिञ्चामि।

स्नापयेत् फलतोयेन ततो 'याः फलिनीरिति'॥ २९

ॐ याः फलिनी र्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पति-प्रसूता स्ता नो मुञ्चन्त्वꣳहसः॥ (ऋ ८।५।१०।१५)

ततो गन्धयुताम्भोभिः सावित्र्या चाभिमन्त्रितैः।
(कस्तूर्य्यगुरुसत्वाद्यै र्गन्ध इत्यभिधीयते॥)
चन्दनेनानुलिप्याथ 'द्रुपदादिव' इत्यृचा। ३०

द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणेवाज्यमापः शुद्धन्तु मैनसः॥ (शुक्ल यजुः २०।२०)

'समुद्रं गच्छ' मन्त्रेण स्नापयेच्चन्दनोदकैः।

समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा। देवं सवितारं गच्छ स्वाहा। मित्रावरुणौ गच्छ स्वाहा। अहोरात्रे गच्छ स्वाहा। छन्दांसि गच्छ स्वाहा। देवं सवितारं गच्छ स्वाहा। यज्ञं गच्छ स्वाहा। सोमं गच्छ स्वाहा। दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा। मनो मे हार्दि यच्छ। दिवं ते धूमो गच्छतु। स्वर्ज्योतिः पृथिवीं भस्मना पृण स्वाहा॥ (शुक्ल यजुः ६।२१)

ततः सहस्रधाराख्यकलशेनामलाम्भसा।

सिञ्चेत् पुनस्तां सवितु र्वरेण्यस्येति' मन्त्रतः ॥ ३१

तां सवितु र्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्यां यामस्य कण्वो अदुहत् प्रपीणां सहस्रधारापयसामहीं गां (कृष्णयजुः ४।४ ६।५।

सहस्रधारा-कलशे वस्तुषट्कं क्रमात् पुनः ।
निःक्षिप्य मन्त्रै स्तन्त्रोक्तैः सिञ्चेत् षोढा वकीरिपुं ॥ ३२
(ओषधी-गन्धबीज-पुष्प-फल-रत्नानीति षट् ।)
तत्र 'या ओषधी' (२५) रित्थमोषधीषु मनु भवेत् ।
'रथे अक्षेति' गन्धेषु 'गन्धद्वारा' मथापि वा ॥ ३३
'आब्रह्मन्निति' बीजेषु पुष्पे पुष्पवती भवेत ।

ओषधयः प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः अयं वो गर्भ ऋत्वियः प्रत्नथ्ं सधस्थमासदत् । (शुक्ल यजुः ११।४८)

फलेषु पुष्पवत्येव रत्नेष्वाशुः शिशानकः । ३४

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभण श्चर्षणीनां संक्रन्दनोऽनिमिष एक वीरः शतथ्ंशेना अजयत् साकमिन्द्रः ।
(ऋ ८।५२।२।१)

पलं स्याद्दशभिष्टङ्कैः पलानां तु शतद्वयं ।
षट् पञ्चाशद्युतं माति यत्र तं कलसं विदुः ॥ ३५
अष्टाभिः कलसैः प्रीत्या गोविन्दमभिषेचयत ।
अकालमूलैः सुदृढ़ैः सुकण्ठैश्च समोदरैः ।
शुद्धाम्भःपूरितै 'रेतो न्विन्द्र'मित्यादिकं पठन् ॥ ३६

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना । शुद्धै रुक्थै र्वावृद्धांसं शुद्ध आशी र्वान्ममत्तु ॥ इन्द्रः शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः । शुद्धो रयिं नि धारय शुद्धो समद्धि सोम्यः ॥ इन्द्रः शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥ (ऋ ६।६।३१।७-९)

तीर्थोद-पूरितैः कृष्णं सिञ्चेत षोड़श-संख्यकैः ।
तुलसी-चन्दन-युतैः पठन् पुरुष-सूक्तकं ॥ ३७

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ 'सर्वतः स्पृत्वा' * त्यतिष्ठद् दशाङ्गुलं ॥ १ ॥ पुरुष एवेदꣳ सर्वं यद्भुतं यच्च भाव्यं । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य महिमाऽतो ज्यायांश्च पुरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत् पुरुषः पादो स्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥ ४ ॥ ततो विराडजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥ ५ ॥ तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्यं । पशूँस्तां श्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥ तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद् यजु स्तस्मादजायत ॥ ७ ॥ तस्मादश्वा अजायन्त ये केचोभयादतः । गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥ तं यज्ञं वर्हिषो-प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥ यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं 'किमस्यासीत् किंबाहु किमूरूपादा' ‡ उच्येते ॥ १० ॥ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद् वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥ ११ ॥ चन्द्रमा मनसो जात श्चक्षोः सूर्य्यो अजायत । 'श्रोत्राद्वायुश्च प्राणाश्च मुखादग्नि रजायत' † ॥ १२ ॥ नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमि र्दिशः श्रोत्रा तथा लोकाँ अकल्पयन् ॥ १३ ॥ यत् पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्ताऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥ सप्तास्यासन् परिधय स्त्रिः सप्तसमिधः कृताः । देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुं ॥ १५ ॥ यज्ञेन यज्ञम-

* विश्वतो वृत्वा । ‡ किमस्य कौ बाहू का ऊरू पादा । † मुखा-दिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ।

यजन्त देवा स्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥ (ऋ ८।४।१७।१८।१९।१६)
अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्तस्य देवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतं पुरुषं महान्त मादित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥ प्रजापति श्चरति गर्भेन्तरजायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरा स्तस्मिन् ह तस्थु र्भुवनानि विश्वा ॥ १९ । यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ २० ॥ रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे । २१ । ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं । इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण ॥ २२ ॥ (शुक्ल यजुः ३१।१७-२२)

ततोऽङ्गमार्जनं कृत्वा तद्वस्त्रं परिवर्त्य च ।
'अभिवस्त्रेति' मन्त्रेण सुवस्त्रे परिधापयेत् ॥ ३८

अभिवस्त्रा सुवसनान्यर्षाभिवेतुः सुदुवाः पूयमानः । अभिवन्ना भर्त्तवे नो हिरण्याभ्य श्वात्रा थेना देव सोम ॥ (ऋ ७।४।२०।५०)

यज्ञोपवीत-मन्त्रेण यज्ञसूत्रं निवेदयेत् ।

यज्ञोपवीतं परम पवित्रं प्रजापते र्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

सहदेवा सदाभद्रा सूर्य्यावर्त्ता कुशाग्रकैः ।
शिरीष-रजनीभ्याञ्च 'काण्डात् काण्डेति' मन्त्रतः ॥ ३९
निर्मन्त्रक ध त—

काण्डात् काण्डात् प्ररोहन्ती पुरुषः परुषस्परि । एषा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ (शुक्ल यजुः १३।२०)

ततो निम्बराजीलवण-सर्षपैः।
दृष्टिमुत्तार्य्य तोयेषु मत्स्यमोचनमाचरेत् ॥ ४०
गृहीपीठमथानीय कृत्वा पादाब्ज-धावनं।
पुनराचमनीयानि यथाविधि निवेदयेत् ॥ ४१
मङ्गलार्थन्तु कलशं सजलं करकान्वितं।
फलादि-सहितं रम्यं न्यसेदथ हरेः पुरः ॥ ४२
'तच्चक्षु'रिति मन्त्रेण नेत्रोन्मीलनमाचरेत्।

तच्चक्षु र्देवहितं 'पुरस्ताच्छुक्र' * मुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शत ँ। 'शृणुयाम शरदः शतं प्रब्रुवाम शरदः शतमदीनाः स्याम शरदः शतं। भूयश्च शरदः शतान्' † ॥ (ऋ५।५।११।१६)

'अञ्जते'ति तु मन्त्रेण विधाय नयनाञ्जनं ॥ ४३

अञ्जते व्यञ्जते समंजते क्रतुँ विहन्ति मधुनाभ्यञ्जते। सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्ययपावाः 'पशुसांशु' ‡ गृभ्णते ॥
(साम उ १६।४)

रोचना-तिलकं कुर्य्याद् 'युञ्जन्ती' ति तु मन्त्रतः।

युञ्जन्ति ब्रध्नमरुष चरन्तं परितस्थुषः। रोचन्ते रोचना दिवि ॥
(शुक्ल यजुः २३।५)

दूर्वा अष्टोत्तरशतं तूलपञ्जीश्च मङ्गलाः।
ततो मात्रादि-हस्तेन धारयेदस्य मस्तके ॥ ४४
होमं तिलानां दानञ्च वापञ्चाथ समाचरेत्।
तथाहि—उद्वर्त्तनं तिलैः स्नानं हवनं वपनं तथा।
कुर्य्याद् दानादने चेति षट्तिली नाम संदिति ॥ इति ४५
दत्त्वा पुष्पाणि माल्यानि 'दोर्वायुत्वे' त्यृचा ततः।
पांतं प्रतिसरं रम्यं वध्नीयान्मणिबन्धके ॥ ४६

---

* शुक्रमुच्चरत्। † इत्यधिकः, वेदे न दृश्यते। ‡ पशुमपशु।

दीर्घायुत्वाय बलाय वर्चसे सुप्रजस्त्वाय चासा अथो जीव शरदः शतं ॥

'प्रतिपदसीत्यादर्श.....

प्रतिपदसि प्रतिपदे त्वा अनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥ (शुक्ल यजुः १५।८)

'घृतवत्या' घृतं तथा । प्रदर्श्य.....

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥
(ऋ ५।१।१४ १)

चामरेणाथ 'वातो वा मने'त्यभिवीजयेत् ॥ ४७

वातो वा मनो वा गन्धर्वा सप्तविंशतिः । ते अग्रेश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः ॥ (शुक्ल यजुः ६।७)

ततो 'हिरण्यरूपे'ति भूषणं विनिवेदयेत् ॥

हिरण्यरूपः स हिरण्यसंदृगपात्रपात् सेदु हिरण्यवर्णः । हिरण्ययात् परियोने निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ (ऋ २।७।२३।१०)

ततः कृते तु गोदाने वन्दापनमिदं भवेत् ॥ ४८
महीगन्धादिभि र्द्रव्यै स्तत्तन्मन्त्र-समन्वितैः ।
(मही गन्धः शिला धान्यं दूर्वा पुष्पं फलं दधि ।
घृत-स्वस्तिक-सिन्दूरं शङ्ख-कज्जल-रोचनाः ॥ ४९
सिद्धान्नं काञ्चनं रौप्यं ताम्रं सिद्धार्थ-दर्पणौ ।
दीपः प्रशस्तपात्रञ्च वन्दनीयाः शुभे दिने ॥ ५०)

'भूरसि' इति मही । (९) पूर्वोक्त एव । गन्धं—'त्वां गन्धर्वा' इति ब्रुवन् ।

'त्वां गन्धर्वा अखनं त्स्वामिन्द्र स्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यस्मादमुच्यत ।' (शुक्ल यजुः १२।९८)

'प्र पर्वतस्येति' शिलां.....

प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसि च इयानाः। ता आववृत्रं न धरागुदक्ता अहिं बुध्न्यमनु रीयमाणाः। विष्णो र्विक्रमणमसि विष्णो र्विक्रान्तमसि विष्णोः क्रान्तमसि ॥ (शुक्लयजुः १०।१६)

धान्यं 'धान्यमसीति' च ॥ ५१

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्नात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि (शुक्लयजुः १।२०)

दूर्वां काण्डात् काण्डेति'।

ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि। एषा नो दूर्वे प्रतनु सहस्रेण शतेन च। (शुक्ल यजुः १३।२०)

पुष्पं—ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं। इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण ॥ (शुक्ल यजुः ३१।२२)

फलं—ॐ याः फलिनी र्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पति-प्रसूता स्ता नो मुञ्चत्वंहसः ॥ (ऋ ८.५।१०।१५)

दधि—ॐ दधि क्रावण्णो अकारिषं जिष्णो रश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रण आयुंषि तारिषत् ॥ (ऋ ३।७।१३।६)

घृतं—ॐ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा। द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥

(ऋ ५।१।१४।१)

स्वस्तिकं— ॐ स्वस्ति नः इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति न स्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पति र्दधातु ॥

(ऋ १।६।१६।६)

सिन्दूरं—ॐ सिन्धोरिव प्राध्वने शुघनासो वातप्रमियः पतयन्ति यह्वाः । घृतस्य धाराः अरुषो नवाजी काष्ठाः भिन्दन्नूर्मिभिः पिन्वमानः ॥ (ऋ ३।८।११।७)

शंखं—ॐ अग्नि ऋषिः पवमानः पाञ्चजन्यः पुरोहितः तमीमहे महागयम् ॥ (शुक्ल यजुः २६।९)

अञ्जनं—ॐ समिद्धो अञ्जनकृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः । वाजी वहन्वाजिनां जातवेदो देवानां रक्षि प्रियमा सधस्थं ॥ (शुक्ल यजुः २९।१)

रोचनां—ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः । रोचन्ते रोचना दिवि ॥ (शुक्ल यजुः २३।५)

सिद्धान्नं—अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् । क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं । विपानश्ं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयो मृतं मधु ॥ (शुक्ल यजुः १९।७५-७२)

काञ्चनं हिरण्येति—ॐ हिरण्यरूपः स हिरण्यसंदृगपानपात् सेदु हिरण्यवर्णः । हिरण्ययात् परियोनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ (ऋ २।७।२३।१०)

रूप्यं—ॐ रूपेण वो रूपमभ्यागांतुथो वो विश्ववेदा विभजतु । ऋतस्य पथा प्रेत चन्द्र दक्षिणाः । विश्वं पशव्यंतरिक्षम् । यतस्र सदस्यैः ॥ (शुक्ल यजुः ७।४५)

ताम्रं—असौ य स्ताम्रा अरुण उत बभ्रुः सुमङ्गलः । ये चैनश्ं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाश्ं हेड ईमहे ॥ (शुक्ल यजुः १६।६)

सिद्धार्थं—ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत किरामि । यं मे निष्टनो यममात्यो निचखानेदमहं त वलगमुत्किरामि ।

यं मे सबन्धु र्यमसबन्धु र्निचखानेदमहं तं वलगमुत किरामि। यं मे सजातो यमसजातो निचखानोतकृत्याः किरामि॥ (शुक्लयजुः ५।२३)

दर्पणं—ॐ प्रतिपदसि प्रतिपदे त्वा अनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा॥ (शुक्लयजुः १५।८)

दीपं—'श्रिये जात' इति क्रमादेकैकमादरात वन्दापयेत्॥

ॐ श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधातु। श्रियं वसाना अमृतत्वमायन् भवन्तु सत्या समिथा मितद्रौ॥ (ऋ ७।४।४।४)

तत आमरेण गायत्र्या। ततः सर्वैरेभि र्मङ्गलवस्तुभिः—

पूर्णं प्रशस्तपात्रञ्च पाणिभ्यां धारयेत् कृती।
पठन् 'स्वस्ति न इन्द्रेति' मही गन्ध शिलेति च॥ ५२
वन्दापयेदवहितः शनै र्वारत्रय मुदा।
(महीगन्धशिलाधान्यं दूर्वा पुष्पं फलं दधि।
घृतं स्वस्तिक-सिन्दूरं शंखं कज्जलरोचना।
सिद्धान्नं काञ्चनं रूप्यं ताम्रं सिद्धार्थदर्पणौ।
दीपं प्रशस्तपात्रञ्च वन्दनीया शुभे दिने॥)
उपायनोपनयनं ततो गोकुल-वासिभिः।
अथ संमाननं तेषां वस्त्रगन्धस्रगादिभिः॥ ५३

'धूरसीति' ततो धूपं—

ॐ धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः। देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमं। (शुक्ल यजुः १।८)

दीपं—ॐ अग्निर्ज्योतिरित्यृचा दीपं निवेद्य हरये।

ॐ अग्निर्ज्योति र्ज्योतिरग्निः स्वाहा। सूर्य्यो ज्योति र्ज्योतिः सूर्य्यः स्वाहा। अग्नि र्वर्चो र्ज्योतिर्वर्चः स्वाहा। सूर्य्यो वर्चो र्ज्योति

वर्चः स्वाहा । ज्योतिः सूर्य्यः सूर्यो ज्योतिः स्वाहा । (शुक्ल यजुः ३।९)

निवेद्यानि निवेदयेत् ।

क्षीरसार-कृतान् काकान् गृध्रानपि सिताकृतान् ।
तिलतण्डुलि लाजांश्च पायसं पानकानि च ॥ ५४
चतुर्विधानि चान्नानि रसै र्युक्तानि षड्विधैः ।
संपूर्णे भोजने पात्रे दद्यादाचमनं हरेः ॥ ५५
ततो निवेद्य ताम्बूलं घनसारादि-संस्कृतं ।
महानीराजनं कुर्य्यादारात्रीति तु मन्त्रतः ॥ ५६
सौवर्णे राजते काश्ये स्थाले परम-शोभने ।
कुङ्कुमेन लिखेत् पद्मं वसुपत्रं मनोहरं ॥ ५७
तत कर्णिकायां पिष्टेन दीपपात्रे विनिर्मिते ।
दीपमेकं विनिक्षिप्य वसुपत्रेऽष्टदीपकान् ॥ ५८
यव-गोधूम-दुग्धादि-रचितान् शर्करायुतान् ।
मूलमन्त्रेण चाभ्यर्च्य तत आरात्रिकं कृतो ॥ ५९
स्थालकं तत् समुद्धृत्य मस्तकान्तं पुनः पुनः ।
नव वारान् भगवत स्ततो नीराजनं चरेत् ॥ ६०
'द्यौः शान्ति' रिति मन्त्रेण विहिते शान्तिकर्मणि ।

द्यौः शान्ति रन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्ति वनस्पतयः शान्ति र्विश्वे देवाः शान्ति र्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।

(शुक्ल यजुः ३६।१७)

आरात्रि मन्त्रः—अभिषिच्यैव दूर्वाद्यैः 'समुद्रे'त्यादि-मन्त्रतः ॥ ६१

समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः ।
इन्द्रो या वज्री वृषभो रराद आपो देवीरिह मामवन्तु । या आपो
दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयञ्जाः । समुद्रार्था

याः शुचयः पावका स्ता आपो देवीरिह मामवन्तु—इत्यादयः । *
(ऋ ५।४।१६।१-२)

'अद्धीदिन्द्रेति' मन्त्रेण तमर्वन्तमृचाथवा ।
ब्राह्मणैः प्रीतमनसा आशीर्वचनमाचरेत् ॥ ६२

अद्धीदिन्द्र प्रस्थितेमा हवींषि च नो दधिष्व पचतोत सोमं ।
प्रयस्वन्तः प्रति पुर्य्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः ॥
(ऋ ८।६।२२।८)

तमर्वन्तं न सानसिमरुषं न दिवः शिशुं । मर्मृज्यन्ते दिवे दिवे ॥ बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः । अच्छा न हूत उदरं ॥ उतत्या यजता हरी कुमारात् साहदेव्यात् । प्रयता सद्य आददे ॥ एष वां देवावश्विना कुमारः साहदेव्यः । दीर्घायु रस्तु सोमकः ॥ तं युव देवावश्विना कुमारं साहदेव्यं । दीर्घायुषं कृणोतन ॥ (ऋ ३।५।१६।६-१०)

ततः स्तुवीत गोविन्दं पौराणैर्वैदिकैरपि ।
सूक्तैर्मन्त्रै रहस्यैश्च स्तवैः स्तोत्रैश्च भक्तिमान् ॥ ६३
दिवसं गमयन्नेवं हरिप्रियजनैः सह ।
व्रतादिपूर्वकं कुर्य्याद् भविष्योत्तर-दृष्टितः ॥ ६४
निशीथे भग-जन्मन्यभिषेकादि-रङ्गकं ।
गीतनृत्यादिभिश्चात्र विदध्याज्जागरोत्सवं ॥ ६५
ततः प्रभाते निष्पाद्य व्रजेन्द्रोत्सवमुत्तमं ।
कृत्या महाप्रसादान्नं भुञ्जीत सह वैष्णवैः ॥ ६६
लोकवद् गोकुलस्यापि व्यवहारादि-दर्शनात् ।
'जन्मर्क्षयोगे समवेतयोषितां चकारसूनो रभिषेचनं सती ।

---

* यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां
मधुश्चुतः शुचयो याः पावका स्ता आपो देवीरिह मामवन्तु ।

जन्मर्क्षं तेऽद्य भवति विप्रेभ्यो देहि गाः शुचिः ॥

'गोमूत्रेण स्नापयित्वा पुन र्गोरजसार्भक'मित्यादि दृष्ट्या वशमाद्

(६।२०) व्रजभावेन सेविना ।

एष जन्मतिथि-स्नानविधिः कृष्णस्य कीर्त्तितः ।
य एवं विधिना कुर्य्यात्तस्य सुष्ठु फलं शृणु ॥ ६७
गोविन्दस्य प्रियो भूत्वा गाढ़-प्रेमभरान्वितः ।
वृन्दावने सदा तस्य साक्षात सेवां समाचरेत् ॥ ६८

इति श्रीश्रीरूपगोस्वामि-विरचितः श्रीकृष्णजन्माष्टमी-स्नानविधिः समाप्तिमगमत् ।

